© सर्वाधिकारः प्रकाशकाधीनः ।

पत्रिका नाम — 'वाग्वै ब्रह्म' ।
(सन्दर्भिता मूल्याङ्कता च वार्षिकी शोधपत्रिका)

अङ्कः — प्रथमः

प्रकाशकः — प्रो. प्रकाशचन्द्रः, व्याकरणविभागाध्यक्षः

प्रकाशनस्थलम् — व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

प्रकाशनवर्षम् — 2016-17

मुद्रकः — वन्दना आर्ट्स, 56, स्टेशन प्लाझा,
स्टेशन रोड, भाण्डुप (प.), मुम्बई 78 ।

संरक्षकः — प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
नवदेहली ।

प्रधानसम्पादकः — प्रो. सुदेशकुमारशर्म्मा
प्राचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

सम्पादकमण्डलम् —
प्रो. प्रकाशचन्द्रः, विभागाध्यक्षः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
प्रो. बोधकुमारझाः, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
डॉ. माधवदत्तपाण्डेयः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
डॉ. नवीनकुमारमिश्रः, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
श्री. सुरेशचेमटे, शोधच्छात्रः, (S.R.F.) राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
श्रीमती ऋतम्भरा पाण्डेयः, शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

## पुनर्वीक्षकमण्डलम्

- प्रो. ( श्रीमती ) अर्चना दूबे,
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- डॉ. दिलीपकुमारझाः,
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- डॉ. श्रीमती डौली जैन ।
  वनस्थली विद्यापीठ, राजस्थान ।
- डॉ. अशोकचन्द्रगौडः
  राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,
  हिमाचलप्रदेशः ।

## मूल्याङ्कनकर्तृमण्डलम्

- प्रो. मदनमोहनझाः, आचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- डॉ. देवदत्तसरोदे, सहायकाचार्य,
  शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईः, महाराष्ट्रम् ।
- डॉ. वी. एस्. वी. भास्कररेड्डी, सहायकाचार्यः,
  शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- डॉ. ई. आर्. नारायणन्, साहित्यविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।

❖❖❖

Scanned by CamScanner

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शब्दानुशासनविमर्शः | प्रो. प्रकाशचन्द्रः | 01 |
| 2. | पस्पशाह्निकग्रन्थिविमोकः | प्रो. बोधकुमारझाः | 10 |
| 3. | माहेश्वरसूत्रेषु द्विधा णकारानुबन्धविमर्शः | डॉ. अशोकचन्द्रगौडशास्त्री | 21 |
| 4. | भाष्यानुसारिशब्दार्थसम्बन्धविमर्शः | डॉ. शरदचन्द्रसाहुः | 24 |
| 5. | सैषा संस्कृते भाषितभङ्गी | डॉ. दीपेशकतिरा | 28 |
| 6. | शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे | डॉ. माधवदत्तपाण्डेयः | 34 |
| 7. | णकारानुबन्धत्वविचारः | डॉ. नवीनकुमारमिश्रः | 39 |
| 8. | महाभाष्यपस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | श्रीसुरेशचेमटे | 45 |
| 9. | पस्पशाह्निके प्रयुक्तविशिष्टशब्दानां परिशीलनम् | श्रीमती ऋतम्भरा पाण्डेयः | 52 |
| 10. | लृकारोपदेशविमर्शः | श्रीसत्यराजरेग्मी | 58 |
| 11. | पस्पशाह्निकोक्तमन्त्रार्थविमर्शः | सुश्रीः विदुषी बोल्ला | 62 |
| 12. | सिद्धे शब्दार्थसम्बन्धे | श्री ईशान्तः | 76 |
| 13. | अथ शब्दानुशासनम् | सुश्रीराधाशर्म्मा | 82 |
| 14. | व्याकरणाध्ययनस्य मुख्यगौणप्रयोजनानि | श्रीआशिषडोगरा | 85 |
| 15. | रक्षोहागमलघ्वसन्देहा' इत्यस्य विमर्शः | श्रीचन्द्रमापौड्यालः | 92 |
| 16. | पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | सुश्रीः मुग्धा चन्द्रकान्त दाते | 95 |
| • | संगोष्ठीप्रतिवेदनम् | | 102 |


❖❖❖

Scanned by CamScanner

# सैषा संस्कृते भाषितभङ्गी

✍ डॉ. दीपेश कतिरा

चारुदेवशास्त्रिमहाभागः १९५७ तमे ईशवीये वर्षे वाग्व्यवहारादर्शनामकं ग्रन्थं प्राणयत् । तत्र चिन्तनाधीनेषु वाक्येषु ५४९ तमस्य वाक्यस्य विमर्शावसरे स लिखति, 'इति प्रचलद्भाषानुकृतिः । नैषा संस्कृते भाषितभङ्गी' इति । अपि च ६५४ तमस्य वाक्यस्य विमर्शावसरे स लिखति, 'राज्याभिषेकं ददुरित्यागन्तुकोऽसाम्प्रदायिको वाग्व्यवहारः । संस्कृतवाङ्मये नैकत्रा- प्येष समाश्रितः पूर्वैः सूरिभिरिति नायमादृत्यः । राज्ये कश्चित्त- दर्होऽभिषिच्यते.... इत्येव संस्कृते भाषितभङ्गी' इति । किं मासः ( मासात्मकः कालः ) नेयो भवति, याप्यो वा? इति चेत् याप्य एव इति बालोऽपि अवगच्छति । तथा सति 'यक्षः तस्मिन् अद्रौ कतिचित् मासान् अनयत्' इति प्रयोगः किं संस्कृते व्यवहारानुपाती उत न? इति चेत् अस्त्येव व्यवहारानुपाती । यतः सैषा संस्कृते भाषितभङ्गी । तत्र मेघदूते महाकविप्रयोगः प्रमाणम् । भाषितभङ्ग्याः ज्ञानं शिष्टप्रयोगात् भवति। तस्मात् शिष्टप्रयोगाः परिशीलनीयाः भवन्ति । एतया दृष्ट्या रामायण-भारत-पुराणादयः ग्रन्थाः क्रमशः अवलोकनीया भवन्ति तस्मिन्नेव क्रमे भाष्यमपि अवश्यमवलोकनीयं भवति । शोधपत्रेऽस्मिन् महाभाष्यस्य प्रथमे आह्निके भाषितभङ्गीनामध्ययनं विहितं वर्तते । ( स. )

## भूमिका

संस्कृतेन स्वाभिप्रायाभिव्यक्तिः, काव्यरचना, टीकानां रचना च बहोः कालात् जायमाना अस्ति । राष्ट्रियसंस्कृतसंस्थानसदृशानां नैकेषां पारम्परिकविश्वविद्यालयानाम् उदये जाते प्रशासने, इतिवृत्तवर्णने, सद्यस्कविषयाणां चर्चासु अपि संस्कृतस्योपयोगः प्रवृद्धो दृश्यते। यथा मराठी-सदृशीनां भाषाणां प्रयोक्तारः सुलभाः तथैव केचित् संस्कृतभाषायाः अपि नित्यशः प्रयोक्तारः विद्यन्ते । मराठीभाषाप्रयोक्तृभिः यथा वंशपरम्परया इयं भाषा अधिगता वर्तते, तथैव वंशपरम्परया संस्कृतभाषामधिगतवन्तः संस्कृतभाषाप्रयोक्तारः अङ्गुलिगणनीया एव स्युः । तथा स्थितौ नैकदा प्रयुज्यमानायां संस्कृतभाषायां आधुनिकभारतीयभाषाणां छाया सुलभा । चारुदेवशास्त्रिणा प्रकाशितात् संस्कृतसाहित्यात् नैकानि तथाविधानि वाक्यानि उद्धृत्य स्वीये वाग्व्यवहारादर्शे चर्चितानि, तत्र संशोधनानि च सूचितानि । सेयं मातृभाषाच्छाया न



Scanned by CamScanner

सदैव भ्रामिका भवति । यतो हि प्रचरद्भारतीयाः भाषा अपि संस्कृतादेव उद्भूताः 'माता चलच्चित्रं द्रष्टुं न ददाति' इति वाक्ये 'देखने नहीं देती' इत्येव भूतस्य हिन्दीवाक्यस्य अनुकृतिः सुस्पष्टा । किन्तु तस्मादेव इदं वाक्यं संस्कृतभाषितभङ्गीम् अतिक्रामति इति वक्तुं न शक्यम् । कालिदासेन अभिज्ञानशाकुन्तलस्य षष्ठेऽङ्के द्वाविंशतितमे श्लोके 'वाष्पश्च न ददात्येनां द्रष्टुं चित्रगतामपि' इति तत्सममेव प्रयोगं करोति । अतोऽस्मिन् सन्दर्भे भाषाविज्ञानस्थायाः 'इडियम्' इत्यस्याः कल्पनायाः विचारः कर्तव्यः ।

**इडियम् -**

इडियम् - शब्दः प्रायः द्वयोः अर्थयोः प्रयुज्यते । 'गिरिम् आरोढुं प्रयतमानस्य मम प्रथमग्रासे एव मक्षिकापातः' इति पदसमुदायः इडियम् इति उच्यते । एषः पदसमुदायः अपरिवर्ती । प्रयोगवेलायाम् अस्य पदानाम् अस्मिन्नेव क्रमे उच्चारणम् अनिवार्यम् । अस्य अभिधातः भिन्नः एव अर्थो ग्राह्यो भवति श्रोत्रा । अस्य भाषान्तरे अनुवादे कर्तव्येऽपि अभिहितार्थः सर्वथा त्याज्यो भवति । एतादृशानां इडियम्-रूपाणां भूयान् प्रयोगः सर्वासु भाषासु भवति । संस्कृतम् अपि तत्र नापवादभूतम् । 'संस्कृतवाङ्मयस्थानां वचोविच्छित्तीनां समीक्षा' इति शीर्षकयुता त्रिदिवसीया अखिलभारतीया कार्यशालापि कर्णाटक-संस्कृतविश्वविद्यालयेन 2014 तमे ईशवीये वर्षे समायोजिता आसीत् । तत्र Idiomatic Expressions इत्यस्य कृते 'वचोविच्छित्ति' - शब्दः प्रयुक्तः विद्वद्भिः । इतोऽन्यस्मिन्नपि अर्थे 'इडियम्' - शब्दः प्रयोज्यते । कयाचित् भाषया कस्यचिदर्थस्य प्रकटनाय यां शैलीं तन्मातृभाषिकः समुचितां मन्यते सा शैली तस्याः भाषायाः इडियम् भवति । भाषायाः वाक्यरचनापद्धतिः यादृच्छिकी भवति । तां पद्धतिम् अननुसृत्य उक्तं वाक्यम् अपि अर्थसमर्पकं तु भवति एव । तथापि तन्मातृभाषिकाया तद् म्लेच्छितमिव (Solecistic) भाति । सेयम् अर्थप्रकटनस्य शैली 'इडियम्' इति उच्यते । लौकिकभाषायाः इडियम् - परिज्ञाने लोकः एव प्रमाणम् । तत्र भगवता भाष्यकारेणापि सिद्धशब्दस्य पदार्थम् अन्विष्यता लौकिकप्रयोगाः एव समाश्रिताः (दृश्यताम् पृ. 23 - 'नित्यपर्यायवाची सिद्धशब्दः । कथं ज्ञायते । यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा सिद्धा द्यौः, सिद्धा पृथिवी......') । चारुदेवशास्त्रिणा वाग्व्यवहारदर्शकनामके ग्रन्थे किञ्चित् वाक्यम् उदाहृतम् । तदित्थम् - 'त्यागस्तपस्या च नः संस्कृतेरात्मा, शब्दान्तरेऽध्यात्मप्रधानेयम्' इति । अस्य वाक्यस्य विमर्शे स कथयति, 'संस्कृतिः संस्कार इत्यनर्थान्तरम् । अधुनातनास्तु तत्तच्छिक्षादिसंसकारसंस्कृतायाः कस्याश्चिज्जातेराचारविचारसमुच्चयेऽस्य संकेतमभ्युपयन्ति । पूर्वे तु सभ्यताशब्दमेवात्रार्थे प्रयुयुजिरे। शब्दान्तरे इति प्रचरद्भाषानुकृतिः । नैषा संस्कृते भाषितभङ्गी । आत्मप्रधानेयम् । इत्युक्तं भवति इत्येव वक्तव्यम् । आत्मानमधिकृत्य अध्यात्मम् । इदं च प्रधानशब्देनोत्तरपदेन दुःश्लिष्टम् ।' अत्र चारुदेवशास्त्रिणा भाषितभङ्गी-शब्दः इडियम् इत्यस्मिन्नेवार्थे प्रयुक्तः इति भाति ।

Scanned with CamScanner

**अनुसन्धानपद्धतिः**

संस्कृते तावत् वंशपरम्परया संस्कृतभाषामधिगतवन्तः संस्कृतभाषाप्रयोक्तारः अङ्गुलिगणनीया एव स्युः इति आदावेव उक्तम् । तर्हि संस्कृते इडियम् इत्यस्य स्वरूपं कथङ्कारं परिशीलयितुं शक्यम् ? तत्र शिष्टैः विरचितं संस्कृतसाहित्यमेव प्रमाणम् । इत्थमेव वाग्व्यवहारादर्शे, शब्दापशब्दविवेके च चारुदेवशास्त्रिणा नैकानि संस्कृतभाषित-भङ्ग्यननुसारीणि वाक्यानि प्रत्याख्यातानि । प्रस्तावतरङ्गिणीवाक्यमुक्तावल्यादिषु संस्कृत-भाषितभङ्ग्यनुगुणानि वाक्यानि च प्रदर्शितानि । वामनशिवराम आप्टेमहाभागेनापि संस्कृत-भाषितभङ्ग्याः यथार्थतयाधिगमाय 'गाईड टू संस्कृत कम्पोजिशन' नामके स्वीये ग्रन्थे नैकानि वाक्यानि उदाहृतानि । स्पाये महाभागेन 'संस्कृत सिन्टेक्स' - नामके ग्रन्थे अपि अस्याः विचारः कृतः । किन्तु भाषितभङ्गी प्रतिलेखकमपि भिद्यते । सर्वैरमीभिः शिष्टैः प्रयुक्तानां भङ्गीनां समाहार एव अस्मत्कृते संस्कृतभाषितभङ्गी । तया दृष्ट्या आरामायणात् शास्त्रीयग्रन्थान् यावत् आयुर्वेदात् अर्थशास्त्रं यावत् प्रतिग्रन्थम् अमीषां भाषितभङ्गीनामध्ययनं कर्तव्यं भवति । विदुषां मते व्याकरणमहाभाष्यम् आकरग्रन्थः । अत्र सर्वविधानि तत्त्वानि समुपलभ्यन्ते । अतः अस्मिन् पस्पशाख्ये प्रथमे आह्निके इत्थं संस्कृतभाषितभङ्गीनामध्ययनं विधाय निष्कर्षभूताः अंशाः प्रस्तूयन्ते ।

**नकारस्य वाक्यादौ प्रयोगः**

नकारेण यत्र समग्रं वाक्यं निषेध्यं स्यात् तत्र नकारः वाक्यादौ एव प्रयुक्तो वर्तते । समग्रे अपि पस्पशाह्निके ईदृशाः एकादश प्रयोगाः दृष्टाः । नैकत्रापि एतस्याः परिपाट्याः व्यभिचारः लक्ष्यते । उदाहरणानि -

- न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । (पृ. 5)
- न तज्ज्वलति कर्हिचित् । (पृ. 8)
- नात्यन्तायाज्ञानं शरणं भवितुमर्हति । (पृ. 9)

स्पायेमहाभागेनापि नकारविषये लिखितम् - '(न) It negatives as well single words or notions as whole statements....... on eis tolerabley free where to put the negation. Commonly two places are perferred: either at the head of the whole sentence & so regularly for rhetorical purposes, as in the case of antithesis, epanaphora, also in emphatical denials.......' (पृ. 315)

**परिगणनार्थे खल्वपि**

लौकिकान् शब्दान् उक्त्वा 'वैदिकाः खल्वपि' (पृ. 2) इति उक्त्वा वैदिकान् शब्दान् अपि परिगणयति । समग्रे अपि पस्पशाह्निके परिगणनाय 'खल्वपि' इत्यस्यैव पदसमूहस्य प्रयोगः कृतो दृश्यते । इतराणि उदाहरणानि यथा -

- ऊहः खल्वपि (पृ. 5) ।



Scanned with CamScanner

- अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम् इति अविद्वांसमाहार्धम् (पृ. 13) । अत्र खलु + अपि इति पदसमूहस्य क्रमः विपर्यस्तः दृश्यते ।
- इष्टान्वाख्यानं खल्वपि भवति । (पृ. 19)

**पुनः भूयः**

पुनश्शब्दः भूयश्शब्दः च जातायाः क्रियायाः आवृत्तिं द्योतयतः इति प्रसिद्धमेव । पस्पशाह्निके विशिष्टाः भाषितभङ्गीः वहन्तः पुनश्शब्दयुतानि एकादश वाक्यानि दृग्गोचरताम् आयान्ति उदाहरणानि -

- कानि पुनः शब्दानुशासनस्य प्रयोजनानि (पृ. 4) । किं पुनस्तत् । कथन्जातीयक पुनरुपसर्गः कर्तव्यः, कथञ्जातीयकोऽपवादः ? (पृ. 20) का पुनराकृतिः ? (पृ. 22), किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः? (पृ. 22), कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्? (पृ. 22), किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे? (पृ. 36), का पुनर्वृत्तिः? (पृ. 45), उक्तादधिकं बोद्धुम् अग्रिमः प्रश्नः क्रियमाणः पुनश्शब्देन ज्ञायते । अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते - सिद्धे शब्देऽर्थे सम्बन्धे चेति? (पृ. 25) अत्र पुनश्शब्दाधिक्ये अथशब्दोऽपि पठितः इति विशेषः ।
- किं पुनरद्यत्वे? (पृ. 20), यावता कार्येष्वपि वर्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणं न पुनः कार्ये यः सिद्धशब्द इति? अत्र पुनश्शब्देन विपर्यासः द्योत्यते ।

**कस्मात्/किमर्थम्/ कुतः -**

त्रयाणामपि एषां शब्दानां समाने अर्थे प्रयोगः शक्यः । कस्मात्, किमर्थं च इत्यनयोः अपेक्षया कुतश्शब्दः । उदाहरणम् - कुत एतत्? (पृ. 8), कुत ए तन्नित्यपर्यायवचिनो ग्रहणं न पुनः कार्ये .... (पृ. 23) ।

**हिशब्दः**

इदम् अव्ययं कारणताप्रदर्शनाय प्रयुज्यते प्रायः । पस्पशाह्निके अस्य एकादशसु स्थानेषु प्रयोगः दृष्टः । नैकत्रापि एषः वाक्यादौ प्रयुक्तो वर्तते । उदाहरणानि-

- यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति । (पृ. 8)
- यो हि अजानन्नेव सुरां पिबेत् ... (पृ. 9)
- एवं हि श्रूयते ... (पृ. 19) ।
- सूत्रत एव हि शब्दान् प्रतिपद्यन्ते (पृ. 44)
- उच्चार्य हि वर्णानाह उपदिष्टा इमे वर्णा इति (पृ. 45)

मोनियर विल्यम् महाभागः कोषे स्पष्टं लिखति 'Generally used as particle usually denoting for, because, on account of never standing first in sentence, but generally after the first word......'



Scanned with CamScanner

**अस्तिसन्ती वाक्यादौ**

संस्कृते क्रियापदानि प्रायः कर्तृकर्मभ्यां परं वाक्यान्ते दृश्यन्ते । किन्तु असधातोः लटि रूपं समग्रेऽपि पस्पशाह्निके सप्तकृत्वः वाक्यारम्भे एव प्रयुक्तम् । उदाहरणानि -

- सन्त्येकपदान्यपि अवधारणानि (पृ. 23)
- अस्त्यप्रयुक्तः (पृ. 32)
- सन्ति वै शब्दा अप्रयुक्ताः (पृ. 36)
- अस्ति अन्यत् गर्गादिबिदादिपाठे प्रयोजनम् (पृ. 48) ।

अस्-धातोः, लिङि रूपं तु वाक्यान्ते दृश्यते एव । तद्यथा - किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसन्देहः स्यात् । वामन शिवराम आपटे महाभागेन कोशे उक्तम् 'Often used at the commencement of a tale or narrative in the sense of 'so it is', 'there', or merely as an expletive.' अत्र तु अयं प्रयोगो न तथा । गद्यस्य कस्यचित् वाक्यस्य अन्ते शिष्टप्रयुक्तः अस्तिप्रयोगो मृग्यः ।

**इतरे विशेषाः**

- **विषम उपन्यासः (पृ. ९)** - विषमशब्दः समत्त्वाभावम् अभिधत्ते । किन्तु अत्र अनुचित - अर्थे अत्र विषमशब्दः प्रयुक्तः । 'अनुचितं कथम्', 'विपर्यस्तं वा कथम्' इति वक्तव्ये 'विषम उपन्यासः' इति प्रयोगः कृतो वर्तते ।
- **वेदमधीत्य त्वरिता वक्तारो भवन्ति (पृ. १७)** - सहसा अविमृश्य वदन्ति इति अर्थे अभिधातव्ये 'त्वरिता वक्तारो भवन्ति' इत्येवम् एषः अर्थः अभिधीयते । तेन त्वरितवादिता इह अविचिन्त्यवादितामपि अभिधातुं समर्था इति विज्ञायते ।
- **महतो महतः शब्दौघान् प्रतिपद्येरन् (पृ. २०)** - चारुदेवशास्त्रिणा अस्य अनुवादः इत्थं कृतः 'बडी-बडी शब्दराशियों को जाना जाए ।' तथा स्थिते 'महतः महतः' इति पदसमूहः वीप्सामात्रम् । विशेषणानां वीप्सा हिन्द्यां तु श्रूयते । तद्यथा 'मीठी मीठी बातें' किन्तु संस्कृते तावत् 'मधुरः मधुरः वार्तालापः' इत्थं विशेषणस्य वीप्सा हृद्या न भाति । तस्मात् प्रायः 'बडी-बडी शब्दराशियों को जाना जाए' इत्यस्य अपेक्षया उपरितनस्य वाक्यस्य अनुवादः 'बडेसे बडी शब्दराशियों को जाना जाए' इत्थं स्यात् । अन्यत्रापि 'अणोरणीयान्, महतो महीयान्' इत्यादिप्रयोगश्रवणात् । ओघः जलवेगः इति कोशः । किन्तु शब्दानां महान्तं राशिं द्योतयितुम् ओघः शब्देनापि युज्यते । पद्-गतौ प्रतिना सहितः ज्ञानवाचकः नैकत्र श्रूयते ।
- **पूर्वपदलोपोऽत्र द्रष्टव्यः (पृ. २३)** - दृशिर्-प्रेक्षणे अत्र ज्ञाने प्रयुक्तः । 'पश्यन्नपि च न पश्यति मूढः' इति चर्पटपञ्जरिकायामपि तथा ।
- **किं न महता कण्ठेन नित्यशब्द एवोपात्तः (पृ. २३)** 'महता कण्ठेन उपात्तः' इत्यनेन 'सुस्पष्टतया उच्चारितः' इत्येतावानेव अर्थः बोद्धव्यः । आचार्यस्य शङ्करस्य (13.13) गीताभाष्ये अस्मिन्नेव अर्थे 'कण्ठरवेण उद्घुष्य प्रवक्ष्यामि' इत्येवं प्रयोगः ।



Scanned with CamScanner

- **क्षुत्प्रतिघातार्थमुपादीयते** ( पृ. ३० ) - अत्र क्षुधा सम्बद्धः प्रतिघातशब्दः शान्त्यर्थकः एव । क्षुत्शान्त्यर्थमिति वक्तव्ये प्रतिघातशब्दः प्रयुक्तो वर्तते ।
- **दोषो निर्हण्यते** ( पृ. ३९ ) **दोषो निर्घानिष्यते** ( पृ. ३९ ) - अपाकृतो भवति इति अर्थे अभिधातव्ये निर्हण्यते इति दोषशब्दस्य योगे प्रयोगार्हः ।
- **शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्** ( पृ. ३० ), **शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्** ( पृ. ३१ ), **शक्यं चानेन यत्किञ्चिदपि काष्ठम् . ..** ( पृ. ३१ ) - सर्वेषु अपि एतेषु प्रयोगेषु शक्यम् इति क्लीबे प्रयोगः विशिष्टः । 'शक्यमम्बरमारुह्य अलङ्कर्तुं दिवाकरः', 'शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः' इत्यादिरामायणस्थेषु अपि प्रयोगेषु शक्यशब्दः विशेष्यमनुसरन् क्लीबे प्रयुक्तः । एतत् शक्-धातोः लिङ्गसर्वनाम-नपुंसकयुक्त-कर्मसामान्ये यति प्रत्यये कृते सिध्यति । ततः परं क्षुत्शब्देन योगे अपि 'अन्तरङ्गसंस्कारो बहिरङ्गसंस्कारेण न बाध्यते' इति न्यायेन शक्यशब्दः क्लीबे एव प्रयुज्यते ।
- **द्विगतापि हेतवो भवन्ति तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिताः** ( पृ. ५० )- एषा उक्तिः अथवा मुहावरा कोटौ प्रविशति । तस्मात् एषा वचोविच्छित्तिः इति वक्तुं शक्नुमः ।

**उपसंहारः**

इत्थम् अत्र पत्रे इडियम् इत्यस्य पदस्य विवरणपुरःसरं संस्कृते भाषितभङ्ग्याः अध्ययनस्य सरणी काचित् उपस्थापिता । तामेव विशदीकर्तुं व्याकरणमहाभाष्यस्य पस्पशाह्निकस्थप्रयोगाणां भाषाभङ्गीदृष्ट्या विश्लेषणं प्रस्तुतम् । अनेन अव्ययानां वाक्यरचनायां समुचितस्थानस्य विषये, तत्र तत्र तेषां विशेषार्थद्योतकताविषये, अस्तिक्रियापदस्य वाक्यादौ प्रयोगौचित्यविषये, कैश्चित् शब्दैः सह विशिष्टक्रियापदानां प्रयोगौचित्यविषये च संस्कृतभाषाभिव्यक्तौ प्रयोगार्हाः नैके सूक्ष्मांशाः दृष्टिपथमायाताः इति ।

**सन्दर्भग्रन्थाः**

1. व्याकरणमहाभाष्यम्, प्रकाशकः - भार्गव शास्त्रि जोशी, चौखम्बा विद्याभवन वाराणसी, संस्करणम्- 2011 । 2. व्याकरणमहाभाष्यम्, प्रकाशकः - प्रो. वेम्पटि कुटुम्बशास्त्री, प्रतिभा प्रकाशन, संस्करणम्- 2006 ।

श्रीसोमनाथसंस्कृतविश्वविद्यालयः
वेरावलम्, गुजरातम् ।

Scanned with CamScanner